॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ८९

स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्मनः ।
विसृजनेव बाणौघान्सुषेणं वाक्यमब्रवीत् ॥ १॥

एष रावणवेगेन लक्ष्मणः पतितः क्षितौ ।
सर्पवेद्वृष्टते वीरो मम शोकमुदीरयन् ॥ २॥

शोणितार्द्रमिमं वीरं प्राणैरिष्टतरं मम ।
पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥ ३॥

अयं स समरश्लाघी भ्राता मे शुभलक्षणः ।
यदि पञ्चत्वमापन्नः प्राणैर्मे किं सुखेन वा ॥ ४॥

लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः ।
सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता ।
चिन्ता मे वर्धते तीव्रा मुमूर्षा चोपजायते ॥ ५॥

भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना ।
परं विषादमापन्नो विललापाकुलेन्द्रियः ॥ ६॥

न हि युद्धेन मे कार्यं नैव प्राणैर्न सीतया ।
भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु ॥ ७॥

किं मे राज्येन किं प्राणैर्युद्धे कार्यं न विद्यते ।
यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः ॥ ८॥

राममाश्वासयन्वीरः सुषेणो वाक्यमब्रवीत् ।
न मृतोऽयं महाबाहुर्लक्ष्मणो लक्ष्मिवर्धनः ॥ ९॥

न चास्य विकृतं वक्त्रं नापि श्यामं न निष्प्रभम् ।
सुप्रभं च प्रसन्नं च मुखमस्याभिलक्ष्यते ॥ १०॥

पद्मरक्ततलौ हस्तौ सुप्रसन्ने च लोचने ।
एवं न विद्यते रूपं गतासूनां विशां पते ।
मां विषादं कृत्वा वीर सप्राणोऽयमरिन्दम ॥ ११॥

आख्यास्यते प्रसुप्तस्य स्रस्तगात्रस्य भूतले ।
सोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः ॥ १२॥

एवमुक्त्वा तु वाक्यज्ञः सुषेणो राघवं वचः ।
समीपस्थमुवाचेदं हनूमन्तमभित्वरन् ॥ १३॥

सौम्य शीघ्रमितो गत्वा शैलमोषधिपर्वतम् ।
पूर्वं हि कथितो योऽसौ वीर जाम्बवता शुभः ॥ १४॥

दक्षिणे शिखरे तस्य जातामोषधिमानय ।
विशल्यकरणी नाम विशल्यकरणीं शुभाम् ॥ १५॥

सौवर्णकरणीं चापि तथा सञ्जीवनीम् अपि ।
सन्धानकरणीं चापि गत्वा शीघ्रमिहानय ।
सञ्जीवनार्थं वीरस्य लक्ष्मणस्य महात्मनः ॥ १६॥

इत्येवमुक्तो हनुमान्गत्वा चौषधिपर्वतम् ।
चिन्तामभ्यगमच्छ्रीमानजानंस्ता महौषधीः ॥ १७॥

तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः ।
इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ॥ १८॥

अगृह्य यदि गच्छामि विशल्यकरणीम् अहम् ।
कालात्ययेन दोषः स्याद्विक्लव्यं च महद्भवेत् ॥ १९॥

इति सञ्चिन्त्य हनुमान्गत्वा क्षिप्रं महाबलः ।
उत्पपात गृहीत्वा तु हनूमाञ्शिखरं गिरेः ॥ २०॥

ओषधीर्नावगच्छामि ता अहं हरिपुङ्गव ।
तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ॥ २१॥

एवं कथयमानं तं प्रशस्य पवनात्मजम् ।
सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीः ॥ २२॥

ततः सङ्क्षोदयित्वा तामोषधिं वानरोत्तमः ।
लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः ॥ २३॥

सशल्यः स समाघ्राय लक्ष्मणः परवीरहा ।
विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥ २४॥

समुत्थितं ते हरयो भूतलात्प्रेक्ष्य लक्ष्मणम् ।

साधु साध्विति सुप्रीताः सुषेणं प्रत्यपूजयन् ॥ २५ ॥

एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा ।
सस्वजे स्नेहगाढं च बाष्पपर्याकुलेक्षणः ॥ २६ ॥

अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा ।
दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतम् ॥ २७ ॥

न हि मे जीवितेनार्थः सीतया च जयेन वा ।
को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते ॥ २८ ॥

इत्येवं वदतस्तस्य राघवस्य महात्मनः ।
खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ २९ ॥

तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम ।
लघुः कश्चिदिवासत्त्वो नैवं वक्तुमिहार्हसि ॥ ३० ॥

न प्रतिज्ञां हि कुर्वन्ति वितथां साधवोऽनघ ।
लक्ष्मणं हि महत्त्वस्य प्रतिज्ञापरिपालनम् ॥ ३१ ॥

नैराश्यमुपगन्तुं ते तदलं मत्कृतेऽनघ ।
वधेन रावणस्याद्य प्रतिज्ञामनुपालय ॥ ३२ ॥

न जीवन्यास्यते शत्रुस्तव बाणपथं गतः ।
नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥ ३३ ॥

अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः ।
यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥ ३४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com